1139

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 743

Title: Ganpati Panchayam

743

गणपतिपंचांगम्

	Ganapati Panchangam	Title
		Author
		Editor
		Year, Vols.
		Publisher
743		Remarks

श्रीगणेशायनमः अथगणपतिपंचांगं मेरुकूटेसुखासीनंमहादेवंत्रिलोचनं सनत्कुमारग
णायुक्तंब्रह्माच्युतनमस्कृतं १ सिद्धकिंनरगंधर्वयक्षभूतपिशाचकैः सेवितंस्तुति
भिस्तोत्रैःपार्वतीसहितंशिवं २ सासमेतंभाषमाणंतुब्रह्मणाहरिणासह पार्वतीप्रणता
भूत्वावचनंसमभाषत ३ श्रीदेव्युवाच भगवन्सर्वतत्वज्ञसर्वधर्मप्रकाशक कार्यं
स्यदेवतानांचमनुष्याणांतथैवच ४ विघ्नःकेनभवेद्देवसंशयोच्छिधिशंकर शंकरउवा
च देविवक्ष्येरहस्यंतेश्रूयतांपरमंमहत् ५ अवक्तव्यमभक्तेभ्योभुक्तिमुक्तिप्रदाय
कं विनायकोगणाध्यक्षोगणेशस्तुतिमैःप्रभुः विघ्नहर्ताजगत्राताविघ्नहर्तावविक्रतः ६
तस्यभक्तस्यदेवस्यमन्त्र्यस्यापिमहेश्वरि नविघ्नोबाधतेजातुकदाचियस्यंमंत्रजयेत्सदा
याजपेद्दिवतंमंत्रकश्चितस्याधाम्यते पठेन्नामसहस्रंतुस्तोत्रंसकलकसाधनं विघ्नोनबाध
तेतस्यकार्यहानिर्नवाभवेत् ७ श्रीदेव्युवाच देवदेवमहादेवगणेशस्यजगत्प्रभोः मं
त्रंयंत्रंस्तवंवर्मनाम्नांमाहात्म्यमुत्तमं पटलंपद्धतिंचैवब्रूहिमेपरमेश्वर ईश्वरउवाच

मंत्रो० योदेवदेवोवरदोगणेशोविघ्ननायकः गजाननोगणाध्यक्षोविनायकइतिक्रमः तस्यपंचांग
मखिलंवक्ष्यामितवसुव्रते १२ तत्रादौतप्रवक्ष्यामिमंत्रोद्धारंसुरेश्वरि यंत्रोद्धारंततस्त्वां
२ गंचमहागणपतेःशिवे १३ अथमंत्रोद्धारः तारंमायांककामःस्मरोमलःशिवोनाम्नावर्णतिद्वयं
सर्वसर्वमतोजनंस्फललितजीमूतशर्माक्षरं मेकारवंलवणंसमीरसहितंमंत्रावलेद्धद्वयंत्व
ष्टाविंशतिवर्णकोनिजैर्गदितोविनायकोयंमनुः इत्युद्धारः १४ अथप्रकाशः ॐश्रींह्रीं
क्लींग्लौंगंगणपतयेवरवरदसर्वजनंमेवशमानयस्वाहा इतिमूलं तत्त्वलक्षंसर्वलोकेषु
रुच्याद्या प्रकीर्त्तिता चटेचतुष्पथेशून्येगृहेप्रेतालयेत्वरेत् १५ नास्यविघ्नोनवाशोवंन
वामंत्रविपर्ययः नक्लेशोनचदुर्बुद्धिर्नमोहोनवशीकृता १६ सर्वथासिद्धमंत्रोयंमहेशिवे
यंत्रोद्धारंप्रवक्ष्यामिसर्वाशापरिपूरकं १७ सर्वसंमोहनंचक्रंगणेशस्यजगत्प्रभोः ४ गणपतेः४
त्रिकोणंखयुक्तंषोडशमहाशिवहत्तंतथानागपत्रंकवलंस्फुटंतंचतुर्द्वारयुक्तंप्रसिद्धंगणेश २
स्यश्रीचक्रमेतत्स्मृतं १८ इतिश्रीचक्रं अथध्यानंप्रवक्ष्यामिसर्वसिद्धिप्रदायकं यस्य

स्मरणमात्रेणसर्वोविघ्नःपलायते १९ उद्यत्कोटिदिवाकरांशुसदृशंन्यस्तंकिरीटोज्ज्वलंपा
त्रंमोदकपूर्णमाद्यकलशंपद्माक्षसूत्रे करैः बिभ्रंतंभुजनागसंभवलसत्कायंभुजांगोज्ज्वलं
ध्यायेत्सिंहयुसीगासनंगणपतिंत्रैलोक्यचिंतामणिं २० इतिध्यानं लयांगमथवक्ष्येहंयं
त्रस्यपरमेश्वरि पूजनंसर्वतंत्रेषुगोपितंशरजन्मनः इंद्रधर्मेशवरुणाकुबेरसहितास्तथा
पूर्वपश्चिमयोःपूज्यादक्षिणोत्तरयोस्तथा २२ नंदीवीरेशसौभाग्यभृंगिरीटीविराटकाः
पुष्पदंतकविकर्णोतादिलोहितस्कंदगः २३ नूपुराधविचारोग्ररूपस्कमविनर्त्तकाः गणाः
षोडशसंपूज्यषोडशारेषुसुंदरि २४ करालोविकरालश्चसंहारोरुरुभैरवः महाकालश्च
कालाग्निःसितास्योप्यसितात्मकः २५ अष्टपत्रेषुदेवेशिपूजयेदष्टभैरवान् विनायकंवि
घ्नराजंगणाध्यक्षंगजाननं हेरंबंमोदकाहारंद्वैमातुरमरिंदमं एकदंतंवक्रतुंडंदशारेषु
चपूजयेत् २८ कुमारंचजयंतंचप्रद्युम्नंस्मरसुंदरि त्रिकोणेपूजयेद्विद्वान्महागणप
तिंप्रभुं २९ गणेशंचवगांगेयंसिंहासनमतःपरं बिभ्रांतिकाखुवाहोनत्रिपुरांतकमी
श्वरि ३० उपर्युपर्युपर्युपरिसंपूज्यपूजयेदायुधास्ततः शतपत्रंसहस्रारंदंतमालांमहेश्वरि ३१

मंत्रो० मोदकां ~~[illegible]~~ मोदकंकित पात्रं च कलशं परशुं तथा शंखं संपूजयेद्विद्वौलध्यांगमिदमु
२ च्यते ३३ मंत्रस्यास्य गणेशस्य ऋषिर्ब्रह्माप्रकीर्तितः गायत्रं छंद इत्युक्तं देवो गणपतिस्ततः ३३
शिवस्य बीजं बीजं स्यान्मायाशक्तिरुदाहृता कुरु द्वयं कीलकं स्यात्सर्वमंत्रैकसाधनं ३४ त्रै
लोक्य विजयं देवि विनियोग प्रकीर्तितः अयुतं च जपेन्मूलं वटं कृत्वा वितानके ३५ स्तंभयेदखि
लांल्लोकान्वादिदस्यजलानिव अयुतं संजपेन्मूलं कृत्वा सार्षपवांकुरान् ३६ मोहयेत्परमे
शानं मारयेद्रिपुमंडलं नघा साधक एवात्र जपेदयुतसंख्यया ३७ मुखुथ्यादिसर्विद्दमां
सं रिपुमुच्चाटयेद्ध्रुवं होमेनानेन विधिना जपेनायुतसंख्यया ३८ विद्वेषयेद्ब्रह्माणं गिरि
शं नात्र संशयः वर्नेनिंबरसं कृत्वा जपेन्मूलमथायुतं ३९ वशयेदपि राजानमाकर्षयति योषितः
इतीदं पटलं गुह्यं महागणपतेः शिवे सर्वमंत्रैक सर्वस्वं गोपनीयं विशेषतः ४० इति श्रीरुद्रया
मले तंत्रे गणपतिमंत्रोद्धारविधिर्नाम पटलः समाप्तः श्रीः अथाहं संप्रवक्ष्यामि महागण
पतेः परां गणकसारसर्वस्वमानंदैकतरंगिणीं १ साधकोरात्रिशेषाद्युत्थाय पद्मासनं ब २
ध्वा मूलेन त्रिराचम्य स्वशिरसि सहस्रदलपद्मकेसरोज्ज्वलकर्णिकांतर्गतं निजगुरुं ध्यात्वा

सुकालंकारं उद्वासनमादाय बहिरागत्य मलापकर्षणं विधाय वर्णोक्तशौचं कृत्वा नद्यादौ गत्वा
वाङ्मीकबीजेन दंतान्विशोध्य शिबिजेन गंडूषाणि कृत्वा श्रीं ह्रीं क्लीं इति मलापकर्षणं स्नानं वि
धाय मूलेन गणेशमुद्रया तत्र त्रिकोणं विलिख्य गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिं
धु कावेरि जलेस्मिन्सन्निधिं कुरु इति तीर्थमावाह्य देवं साशिवं मूलेनावाह्य मूलेन मुखं त्रिः
प्रोक्ष्य त्रिरात्मानं पयसि प्रोन्मज्ज्य ह्रीं हंसः श्रीसूर्याय देव एष तेर्घो नमः इत्यर्घत्रयं दत्त्वाज
लादेवरुह्य संध्यां कुर्यात् यथा ततो वामकरे जलं धृत्वा वर्मणावगुंठ्य मूलेन सप्तधाभिमं
त्रयेत् गलितोदकविंदुभिः प्रोक्ष्य इडयांतर्नीत्वा वामनासया विरेच्य दक्षिणहस्ते धृत्वा फडिति
मंत्रेण वामभागस्थशिलायामास्फालयेत् इत्यघमर्षणं विधायाचम्य प्राणायामं कुर्यात्
पूरक १६ कुंभक ६४ रेचक ३२ एवं विधाय गायत्रीं जपेत् ॐ ह्रीं वक्रतुंडाय विद्महे श्रीं क्लीं
एकदंताय धीमहि ग्लौं गं तन्नो गणपतिः प्रचोदयात् ३ इति यथाशक्त्या जप्त्वा गायत्र्या देवी
देवयोरर्घत्रयं दत्त्वा मूलेन समस्तभुवनांतरायहरणं हरपुत्रं गणगंधर्वसिद्धवंदितं दिप्रकट

मंत्रो॰ विकटाननंपरापररूपं गजास्यंध्यं गजाननं महागणपतिंतर्पयामिनमः तस्मिंस्तर्प्यदिव्यौघ
सिद्धौघमानवौघगतान्गुरूंस्तर्पयामिनमः श्रीमूलेनपरिवारान्संतर्प्यसंहारमुद्रयातत्रदेव
३ देव्याविसृज्ययागमंडपमागच्छेत् इतिसंध्याविधिः ततोयागमंडपमेत्य क्रौंश्रींक्लींगंगायैन
मः पूर्वे यंयमुनायै॰उत्तरे संसरस्वत्यै॰दक्षे॰ यांयोगिनीभ्योनमः पश्चिमे क्षांक्षेत्रपालाय॰म
ध्ये इतिद्वारदेवताःसंपूज्य गृहांतःप्रविश्यासनंशोधयेत् ॐ क्रौंश्रींक्लींआंसंआनशुद्धि
मंत्रस्य मेरुपृष्ठऋषिः सुतलंछंदः कूर्मोदेवता आसनमंत्रोविनियोगः ऐंपृथिव्यै॰अंअं
तरायै॰वंवसुंधरायै॰ मूलं पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांदे
विपवित्रंकुरुचासनं ॐ क्रौंश्रींक्लींपद्मासनाय॰ सिंहासनाय॰ भद्रासनायइति अप
सर्पंतुतेभूतायेभूताभूमिसंस्थिताः येभूताविघ्नकर्त्तारस्तेनश्यंतुशिवाज्ञया इतिपठित्वा
तालत्रयंदत्वानाराचमुद्रांप्रदर्श्य गुरुंध्यायेत् अज्ञानतिमिरांधस्यज्ञानांजनशलाकया चक्षु
रुन्मीलितंयेनतस्मैश्रीगुरवेनमइतिसंध्याचमेत् ग्लौंआत्मतत्त्वंशोधयामिस्वाहा ग्लौंवि ३
द्यातत्त्वंशोधयामिस्वाहा ग्लौंशिवतत्त्वंशोधयामिस्वाहा ग्लौंसर्वतत्त्वंशोधयामिस्वाहा
इत्याचम्य सर्वोक्तंप्राणायामत्रयंविधायभूतशुद्धिंकुर्यात् क्रौंकुंडलिनींध्यात्वा श्रींसु

षुम्नावर्त्मनावायुंप्रोच्चार्य क्लीं तत्राविष्टंसमनीयस्वशरीरंक्रमशःसं तत्वविलीनं यंरंलंवंब्रह्मपर्यंत
जीवात्मानंविनिवेश्य हंसःस्कंधामानीयतयासंप्लाव्याविगतकल्मषंदेहंविभाव्यस्वस्थानेजीवमानी
यप्राणान्प्रतिष्ठापयेत् इतिभूतशुद्धिः ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहं ममप्राणाः इह
प्राणाः २६ ममजीवइहस्थितः २६ ममसर्वेंद्रियाणिवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहैवा
गत्यसुखंचिरंतिष्ठंतुस्वाहेति प्राणप्रतिष्ठा ततःपुनराचम्यप्राणायामंविधायन्यासपूर्वकंसं
कल्पंकुर्यात् अस्यश्रीवरदमहागणपतिमंत्रस्य ब्रह्माऋषिः गायत्रंछंदः श्रीमहागणपति
र्देवता गंबीजंक्रौंशक्तिः कुरुकुरुकिलकं श्रीमहागणपतिप्रीत्यर्थेत्रैलोक्यविजयेविनियोगः
ब्रह्मणेऋषये॰शिरसि॰ गायत्रछंदसेनमः मुखे॰ महागणपतयेदेवतायै॰हृदि गंबीजाय॰
नाभौ क्रौंशक्तये॰गुह्ये॰ कुरुकुरुकिलकाय॰पादौ॰ त्रैलोक्यविजयेविनियोगःसर्वांगेषु
गांहृदयाय॰ गींशिरसेस्वाहा गूंशिखायैवषट् गैंकवचायहुं॰ गौंनेत्रत्रयायवौषट् गः अस्त्राय
फट् इतिषडंगः आत्मतत्त्वं अंगुष्ठाभ्यां॰ विद्यातत्त्वं तर्जनीभ्यां॰ शिवतत्त्वंमध्यमाभ्यां॰गुरुत
त्त्वमनामिकाभ्यां॰ योगतत्त्वंकनिष्ठिकाभ्यां शिवतत्त्वं करतलकरपृष्ठाभ्यां॰ इतिकरन्यासः

मंत्रो० आं
४ ॐ अं कं खं गं घं ङं हृदयाय॰ इं चं छं जं झं ञं ईं शिरसे स्वाहा॰ उं टं ठं डं ढं णं ऊं शिखायै वषट् एं तं थं दं
धं नं ऐं कवचाय हुं॰ ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट्
एवं करन्यासः ॐ गं काशीपीठाय॰ हृदयाय॰ ॐ गं कांचीपीठाय॰ शिरसे स्वाहा॰ ॐ गं मथुरीपीठाय
शिखायै वषट् ॐ गं उडियानपीठाय॰ कवचाय हुं॰ ॐ गं अयोध्यापीठाय॰ नेत्रत्रयाय वौषट्
ॐ गं जालंधरपीठाय॰ अस्त्राय फट् इति पीठन्यासः ॐ हृदयाय॰ ह्रीं शिरसे स्वाहा॰ श्रीं व
रद शिखायै वषट्॰ क्लीं सर्वजनं मे कवचाय हुं॰ ग्लौं वशमानय नेत्रत्रयाय वौषट् गं स्वाहा अ
स्त्राय फट् एवं करन्यासः एवं न्यासं विधाय श्रीचक्रं ध्यात्वा चतुरस्रं षोडशदलं वसुदलं
दशारं त्रिकोणं बिंदुं विविंस्य भद्रपीठोपरि मूलेन संस्थाप्य योगपीठपूजां कुर्यात् ह्रीं मंडूका
य॰ कालाग्निरुद्राय॰ मूलप्रकृत्यै॰ आधारशक्तये कूर्माय॰ अनंताय॰ वराहाय॰ पृथिव्यै॰ उपर्यु
परि संपूज्य तन्मध्ये सुधार्णवाय मध्ये नवरत्नविराजितनवखंडमयश्वेतद्वीपाय तत्रैशा
दिदिक्षष्टदलेषु प्रादक्षिण्येन नवरत्नखंडेभ्यो नमः तन्मध्ये पद्मरागखंडाय नमः मध्ये स्व ५
र्णपर्वताय नमः मध्ये विचित्ररत्नखचितरत्नमयवेदिकायै॰ उपरिस्तात् सिंहासनाय॰
पीठस्य कल्पिताग्निकोणादिषु धर्मादिभ्यः कल्पितपूर्वादिषु अधर्मादिभ्यः सिंहासनम

ध्ये आनंदकस्य संविन्नालाय॰ सहस्रदलकमलाय॰ प्रकृतिपत्रेभ्यः विकारकेसरेभ्यः
पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपकर्णिकायै॰ उपरि अं अर्कमंडलाय॰ सों सोममंडलाय॰
रं वं वह्निमंडलाय॰ तं तमसे रं रजसे॰ सं सत्त्वाय॰ ह्रीं गीं क्लीं सर्वमंत्रमयायासनाय॰ ॐ आ
मित्यादि क्षांत मुक्ताय शिवशक्तिसदाशिवेश्वरमहागणपतिसकलात्मने योगपीठाय नमः इति यो
गिनीपीठपूजां कृत्वा पात्राणि स्थापयेत् स्ववामभागे त्रिकोणषट्कोणचतुरस्ररूपं यंत्रं विलिख्य शंखमु
द्रां प्रदर्श्य गमित्यादिषडंगमंत्रैः संपूज्य अस्त्राय फडिति त्रिपादिकां प्रक्षाल्य मूलेन संस्थाप्य ॐ व
ह्निमंडलाय॰ दशकलात्मने॰ महागणपतिपात्रासनाय॰ गंधाक्षतैरभ्यर्च्य तदुपरि संस्थाप्य सूर्यमंड
लाय कलाषोडशात्मने॰ महागणपतिपात्राय॰ इति गंधाक्षतैरभ्यर्च्य ततोंकुशमुद्रया गंगे च यमुने
चेति तीर्थान्यावाह्य मूलेनाष्टधाभिमंत्र्य षडंगैः संपूज्य मत्स्यमुद्रया छादयेत् धेनुमुद्रया संहृत्य वक्ष
हमित्यवगुंठ्य वमित्यमृतीकृत्य शंखचक्रमुसलयोनिमुद्राः प्रदर्श्य तेन जलेन यागवस्तूनि प्रोक्षयेत्
ॐ मूलं परमामृतरूपेण महागणपतिचंद्रमंडलनिवासाय चंद्रामृतेन पूरय २ द्रव्यं पवित्रीकुरु २ ॐ
हं सः स्वाहा अनेन सर्वं प्रोक्षयेत् तत उत्तरे पाद्याचमनीयमधुपर्कपात्राणि संस्थाप्य संपूज्यात्मा
नं तन्मयं विभाव्य ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नमः इति

विराटकाय० इतिप्रथमावरणं ४

मंत्रो० संपूज्य सशक्तिकं देवं मूलेन नव मुद्राः प्रदर्श्य मूलषडंगं कृत्वा प्राणान्प्रतिष्ठाप्य स्वागतमित्युदी
र्य मूलेन पाद्यार्घ्यं कृत्वा एवं पाद्यार्घ्याचमनीयमधुपर्कस्नानादि विधाय माल्यकांबरं गंधाक्षतं
५ धूपदीपनैवेद्यादीन्निवेद्य पुष्पांजलित्रयं दत्वा देवस्यावरणदेवताः पूजयेत् इंद्रधर्मेशाव
रुणाः कुबेरसहितास्तथा पूर्वदक्षिणपश्चिमोत्तरयोः ह्रीं श्रीं नंदिने· वीरईशाय· सौम्यसंस्थाय·
भृंगिरीटिने· पुष्पदंताय· विकतीयाय· अंत्यगणाय· चित्रगणाय· लोहिताय· सुंदराय· नूपुराख्या
य· विचाराय· गुं उग्ररूपाय· सुभाय· ॐ ह्रीं श्रीं विनर्तकाय· इतिगंधाक्षतैरभ्यर्चयेत् इतिद्विती
यावरणं मूलेन पुष्पांजलिं दत्वा· ॐ ह्रीं श्रीं करालाय· विकरालाय· संहाराय· रुरुभैरवाय· महा
कालाय· कालास्याय· सितात्मने· असितात्मने· इतितृतीयावरणं ॐ ह्रीं श्रीं मूलेन पुष्पांज
लिं दत्वा· ॐ ह्रीं श्रीं विनायकाय· विघ्नराजाय· गणाध्यक्षाय· गजाननाय· हेरंबाय· मोदक
हराय· द्वैमातुराय· अरिंदमाय· एकदंताय· वक्रतुंडाय· इतिगंधाक्षतदूर्वाभिः संपूजयेत्
चतुर्थावरणं दशारेषु मूलेन पुष्पांजलिं दत्वा ॐ ह्रीं श्रीं कुमाराय· अग्रेजयंताय· द्वैमप्रख ५
स्याय· इतिगंधाक्षतदूर्वाभिस्त्रिकोणं पूजयेत् इतिपंचमावरणं मूलेन पुष्पांजलिं द
त्वा मूलविद्यामुच्चार्य ह्रीं स्वशक्तिसहिताय· महागणपतये· इतिसप्तधा संपूजयेत् षष्ठावरणं

पुष्पांजलिं दत्वा मूलं गणेशाय· मूलं सिंहासनाय· मूलं विघ्नांतकाय· मूलं आखुवाहनाय· मूलं
त्रिपुरांतकाय· इत्युपरि गंधाक्षतदूर्वाभिः पूजयेत् सप्तमावरणं पुष्पांजलिं दत्वा उपरि मू· श
पु तपत्राय· मू· सहस्रादंष्ट्राय· मू· दंतमालायै· मू· मोदकपात्राय· मूल· परशवे· मू· शंखाय· मू· पाश
ऊन्याय· ॐ दर्शनादपि शंखस्य किं पुनः स्पर्शनेन वा विलयं यांति पापानि हिमवद्भास्करोदये इ
तिसप्तधा संपूजयेत् अष्टमावरणं ततो मूलमुच्चार्य गंधाक्षतदूर्वापुष्पधूपदीपनैवेद्याचमनी
यतांबूलछत्रचामरान्संस्थाप्य देवाग्ने षडंगपूर्वं न्यासं विधाय देवं ध्यात्वा मूलेन मालामुप
र्यं यथाशक्त्या मूलं जपेत् ततो मूलमुच्चार्य देवाय जपं समर्प्य कवचसहस्रनामस्तोत्रपाठानंद
वान्ने कृत्वा मूलं प्रातः प्रभृति सायांतं सायादि प्रातरेव यत् यत्करोमि गणाध्यक्ष तदस्तु तव
पूजनं इति तत्वं संहारमुद्रया सशक्तिकं देवं विसर्जयेत् इति श्रीनित्यपूजायाः पद्धतिं गध
रूपिणीं महागणपतेर्दिव्यां सर्वथा देवि गोपयेत् इति श्रीरुद्रयामले तंत्रे महागणपति पूजा
पद्धतिः समाप्ता श्रीः भैरव उवाच महादेवि गणेशस्य वरदस्य महात्मनः कवचं ते
प्रवक्ष्यामि वज्रपंजरकाभिधं १ अस्य श्रीमहागणपतिवज्रपंजरकवचस्य श्रीभैरव ऋ
षिः गायत्री छंदः श्रीमहागणपतिर्देवता गं बीजं· ह्रीं शक्तिः कुरु कुरु कीलकं· धर्मार्थकाम

मंत्रो॰ मोक्षार्थे पाठे विनियोगः अथ ध्यानं विघ्नेशं विश्ववंद्यं सुविपुलयशसं लोकरक्षाप्रदक्षं सा
क्षात्सर्वापदासु प्रशमनसुमतिं पार्वतीप्राणसूनुं प्रायः सर्वासुरेंद्रान्सुरमुनिगणैः साधकैः पू
६ ज्यमानं कारुण्येनांतरायामितभयशमनं विघ्नराजं नमामि ॐ ह्रीं श्रीं गं शिरः पातु महागणपतिः
प्रभुः विनायको ललाटं मे विघ्नराजो भ्रुवौ मम १ पातु नेत्रे गणाध्यक्षो नासिकां मे गजाननः श्रुती
मेवतु हेरंबो गंडौ मे मोदकाशनः २ द्वैमातुरो मुखं पातु चाधरौ पात्वरिंदमः दंतान्ममैकदंतोव्यात्
वक्रतुंडोवताद्रसां ३ गांगेयो मे गलं पातु स्कंधौ सिंहासनोवतु विघ्नांतको भुजौ पातु हस्तौ मूषक
वाहनः ४ ऊरो ममावतान्नित्यं देवो मूषकवाहनः हृदयं मे कुमारोव्यादुरुपांतः पार्श्वयुग्मकं ५ प्रफलो
मेवतात्पृष्ठं नाभिं शंकरनंदनः कटिं नंदिगणः पातु शिश्नं वीरेश्वरोवतु ६ मेढ्रं मेवतु सौभाग्यो भृं
गिरिटीवगुह्यकं विराटकोवतादूरू जानू मे पुष्पदंतकः ७ जंघे मम विकर्तोव्याद्गुल्फौ रक्षोमर्स्य
गणोवतु पादौ चित्यगणः पातु पादाधो लोहितोवतु ८ पातु पृष्ठं सुंदरोव्याज्जपुराद्योवपुर्मम वि
चरोऽदरं पातु गात्राणि वो ग्ररूपकः ९ शिरसः पादपर्यंतं वपुः पातु विनायकः विस्मारितं तु यत् ६
गते स्थानं गणेशः सर्वदावतु १० पूर्वे मां ह्रीं करालोव्यादाग्नेय्यां विकलेशकः दक्षिणे पातु संहारो नैर्ऋते
रुरुभैरवः ११ पश्चिमे मां महाकालो वायौ कालाग्निभैरवः उत्तरे मां सितास्योव्यात्सहस्रारिस्तु मध्यमे १२

दंतमालादिनांतेव्यान्निधिपात्रं सदावतु कलशो मां निशीथेव्यान्निशांते परशुस्तथा १३
सर्वदा सर्वत्र पातु शंखयुग्मं च मद्वपुः ॐ ॐ राजकुले हं ह्रौं रणभये क्रौं क्रौं ऊं भूतवेताल ह्रीं ह्रीं
तो॰ शत्रुगृहे श्रौं श्रौं ऊं लभये क्लीं क्लीं वनांतेवतु ग्लौं ग्लूं ग्लं ग्लृं गुं सत्वभीतिषु महाव्याख्यातिषु ग्लौं
गं ग्लौं नित्यं यक्षपिशाचभूतफणिषु ग्लौं गणेशोवतु इतीदं कवचं गुह्यं सर्वतंत्रेषु गोपि गं
तं वज्रपंजरनामानं गणेशस्य महात्मनः १४ अंगभूतं मंत्रमयं सर्वाधारैकसाधनं वि
नानेन न सिद्धिः स्यात्पूजनस्य जपस्य च १५ तस्मात्तु कवचं पुण्यं पठेद्वा धारयेत्सदा तस्य सि
द्धिर्महादेवि करस्था पारलौकिकी १६ यं यं कामयते कामं तं तं प्राप्नोति पाठतः अर्द्धरात्रे प
ठेन्नित्यं सर्वाभीष्टफलं लभेत् १७ इति गुह्यं सुकवचं महागणपतेः प्रियं सर्वसिद्धिमयं
पूज्यं गोपयेत्परमेश्वरि १८ इति रुद्रयामले तंत्रे महागणपतिकवचं श्रीः
अथ सहस्रनाम श्रीभैरव उवाच शृणु देवि रहस्यं मे यन्मया कीर्तितं पुरा त
द्वक्ष्यामि गणेशस्य वक्ष्ये नामसहस्रकं १ श्रीदेव्युवाच भगवन् गणनाथस्य सिद्धिद र
स्य महात्मनः श्रोतुं नामसहस्रं मे हृदयं चोत्सुकायते २ भैरवः प्रासे त्रिपुरनाथेपि

मंत्रो० ज्ञातोविघ्नाकुलाःशिवे मोहेनमुह्यतेचेतस्तोत्रंसर्वफलदर्पिताः ३ तदाप्रभुंगणाध्य
क्षंस्तुत्वानामसहस्रकैः विघ्नाहरात्मकार्यंतेकालरुद्रादिवप्रजाः ४ तस्यानुग्रहतो
देविज्ञातोहंत्रिपुरांतकः तमद्यापिगणेशानंस्तौमिनामसहस्रकैः ५ तदद्यतवसत्क्याहंसा
धकानांहितायच महागणपतेर्वक्ष्येदिव्यंनामसहस्रकं ६ अस्यश्रीवरदगणेशस
हस्रनामस्तोत्रस्य भैरवऋषिः गायत्रंछंदः श्रीमहागणपतिर्देवता गंबीजं ऊं ह्रींशक्तिः
कुरुकुरुकीलकं श्रीधर्मार्थकाममोक्षार्थेश्रीमहागणपतिसहस्रनाममंत्रजपपा
ठेविनियोगः ॐ ह्रींश्रींक्लींगणाध्यक्षोध्य ग्लौंगणपतिर्गुणः गुणाढ्योनिर्गुणोगो
माग्रजवक्त्रोविभावसुः विश्वेश्वरोविभ्राद्दीप्तोदापनोधीवरोधनी सदाशांतोजग
न्नातोविष्वक्सेनोविश्वाकूरः विश्वामीविजयीवैद्योवारांनिधिरनुत्तमः अणीयान्
विभवीश्रेष्ठोज्येष्ठोगाथाप्रियोगुरुः ९ सृष्टिकर्ताजगद्धर्ता विश्वभर्ताजगत्पतिः
पतिः पीतविभूषांकोरक्ताक्षोलोहितांबरः १० विरूपाक्षोविमानस्थोविनम्रःसुनयः
सुखी सुरूपःसात्विकःसत्यःशुद्धःशंकरनंदनः ११ नंदीश्वरोमहानंदीवंदिस्तुतो

विलक्षणः दैत्यमर्दीमदाक्षीबोबद्दिरास्फालोचनः १२ सुरात्माविश्वधारीच
विश्वधारोह्यलेपनः परंब्रह्मपरंज्योतिःसाक्षीत्र्यक्षोविकत्थनः १३ वीरेश्वरोवी
रहर्त्तासौभाग्योभाग्यवर्द्धनः भृंगिरीटीभृंगिमालीभृंगिकूजितनादितः १४
विनर्त्तकोविनेतापिविनतानंदनार्चितः वैनतेयोविनम्रांगोविश्वनायकनायकः १५
विनाटकोविराटश्चविदग्धोविधितात्मभूः पुष्पदंतःपुष्पहारीपुष्पमाल्यविभूषणः
१६ पुष्पेषुमर्पनःपुष्टोविकर्त्ताकर्त्तकोकरः अत्यांतकश्चित्तगुणश्चित्तचिंताप
हारकः १७ अचिंत्योचिंत्यरूपश्चंदनाकुलमंडनः लोहिल्लोहितपितोलुप्तोलोहि
ताक्षोविलोभकः १८ लुब्धाशयोलोभरतोलाभदोलंघ्यगात्रकः सुंदरःसुंदरीपु
त्रःसमस्तासुरपातकः १९ नूपुराढ्योविभूषीकोरनारायणोरविः विचारोवांत
दोवाग्मीवितर्कीविजयीश्वरः २० सुप्तोबुद्धःसुदारूपःसुखदःसुखसेवितः वि
कर्त्तनोविपचारीविनष्टोनटनर्त्तकः २१ नटोनाट्यप्रियोनादोनंतोनंतगुणा

ग. स.

८

त्मकः विश्वसृड्विश्वघाती शवितनतास्यो विनर्नकः २२ करालः कामदः कांतः कमनीयः कलाधरः का
रुण्यरूपः कुटिलः कुलाचारी कुलेश्वरः २३ विकरालो रणश्रेष्ठः संहारो हारभूषणः रुरुर्वाल्मीकमुख्योरस्को
रेवतीरमणो रमः २४ महाकालो महादंष्ट्रो महोरगभयानकः उन्मत्तरूपः कालाग्निरग्निसूर्येंदुलोचनः
२५ सितास्यः सितमाल्यश्च सितदंतः सितांशुमान् असितात्मा भैरवेशो भाग्यवान्भगवान्भगः २६
भगात्मजो भगावासो भगदो भगवर्द्धनः शुभंकरः शुचिः शांतः श्रेष्ठः श्रव्यः शचीपतिः २७ वेदाद्यो
वेदकर्ता च वेदवेद्यः सनातनः विद्याप्रदो वेदरसो वैदिको वेदपारगः २८ वेदध्वनिरतो वीरो वरो
वेदांगमर्मवित् तत्वज्ञः सर्वगः साधुः सदयः सदसन्मनः २९ निरामयो निराकारो निर्भयो नित्यरूपभृ
त् निर्वैरो वैरिविध्वंसी मत्तवारणसन्निभः ३० शिवंकरः शिवसुतः शिवानंदविवर्द्धनः शैवः शैत्यश्चे
तास्मितमुखो दुग्धो मोदकभोजनः ३१ देवदेवो दिनकरो धृतिमान्कृतिबांधवः शुद्धात्मा शुद्धिमा
न्शुद्धदीप्तिः शुचिव्रतः ३२ शरण्यः शौनकः शूरः शारदो मोक्षधारकः दारकः शक्तिरव्ययः शांतः शां
करपूजितः ३३ शंकरो निर्भयो नित्यो भयहृन्न्यास्यतत्परः लूनो लीलारसोल्लासी विलासी विभ्रमो भ्र
मः ३४ भ्रमणः शशिभृत्सूर्यः शशिधरणिनंदनः बुधो विबुधसेव्यश्च बुधराजो बलंधरः ३५ जीवो जीव ८
प्रदो जैत्रः स्तुत्यो नत्यो नतिप्रियः जैकेको जिनमार्गज्ञो जैनमार्गविवर्जकः ३६ गोरीसुतो गुरुरवो गो

रांगो गणपूजितः परंपदं परंधाम परमात्मा कविः कुजः ३७ राहुर्दैत्यशिरश्छेदः केतुः कनककुंडलः
ग्रहेंद्रो ग्राहितो ग्राह्यो ग्राहो गुणी घुर्घुरनादितः ३८ पर्जन्यः पीवरः पौत्री पीनवक्षा पराजितः वनेचरो
वनपतिर्वनवासी स्मरोदरः ३९ पुण्यः पूतः पवित्रं च परात्मा पूर्णविग्रहः पूर्णेंदुकलशाकारः सरः पूर्ण
मनोरथः ४० योगात्मा योगभृद्यज्ञो याज्ञिको यागवत्सलः यशस्वी यजमानेष्टो वज्रभृद्वज्रपंज
रः ४१ मणिभद्रो मणिमयो मानी मीनध्वजाश्रितः मीनध्वजो मनोहारी योगिनां योगवर्द्धनः ४२
द्रष्टा स्रष्टा तपस्वी च विग्रही तापसप्रियः तपोमयस्तपोमूर्तिस्तपनश्च तपोधनः ४३ रुचको मो
चको रुष्टः स्तुतस्तोमरधारकः दंडी चंडांशुरव्यक्तः कमंडलुधरोऽनघः ४४ कामी कर्मरतः काल
केकाक्रंदितदिक्तटः भ्रामको जातिपूज्यश्च जाड्यहा जडसूदनः ४५ जालंधरो जगद्वासी हास्य
कृद्गहनो हरिः हविष्मान्हव्यवाहश्च हाटको हाटकांगदः ४६ सुमेरुर्हिमवान्होता हलपुत्रो हलंक
षः हालाप्रियो हृदिश्वेतो कांतो हृदयपोषणः ४७ शोषणः क्लेशहा क्रूरः कठोरः कठिनाकृतिः कु
बेरो धीमयो ध्याता ध्येयो धीमान्दयानिधिः ४८ दविष्ठो दमनो धृष्टो दाता त्राता सितोऽसितः
दुर्गतो नोगमी गम्यो निर्निशो जटिलोऽजरः ४९ जनजीवो जितारातिर्जगद्व्यापी जगन्मयः चामी

न

ग. स. करनिभोनाथोनलिनायुतलोचनः ५० रोचनोमोचनोमंत्रीमंत्रकोटिसमाश्रितः पंचभूतात्म
९ कःपंचसायकःपंचवक्त्रकः ५१ पंचमःपंचमःपूर्वःपूर्णःकीर्णालकःकुणिः कठोरहृदयग्रीवालंक
तोललनाशयः ५२ कोलकविनोबृहन्नासोमासपक्षर्तुरूपवान् ध्रुवोद्रुतगतिर्धर्म्योधर्मश्नादप्रि
योनलः ५३ अगस्त्योग्रस्तभुवनोभुवनैकमलापहः सागरःसुगतिःस्वक्षःसानंदःसाधुपूजितः ५४
सतीपतिःसमरसःसनकःसलुःसुरः सुरप्रियोवसुपतिर्वासवोवसुपूजितः ५५ वित्तदोवित्तना
थश्चधनिर्नाथधननायकः राजीराजीवनयनःस्मृतिदःकृत्तिकस्वरः ५६ अश्विनोश्विमुखःशु
भ्रोभरणोभरणाप्रियः कृत्तिकासनकःकालरोहीरोहणपादुकः ५७ रिषभेवस्तोरिमंदेवरोहिणीमो
हनोऽमृतं मृगराजोमृगशिरोधामवोमधुरध्वनिः ५८ आर्द्राकरोगुहाबुद्धिर्महोरगोर्वीविभूषणः
मा भूक्षेपदत्ताविभवोत्र्यकरालःपुनर्मयः ५९ पुनर्देवःपुनर्जेतापुनर्जीविःपुनर्वसुः ।स्तं तितिरात्ति
भिकेतुश्चातिमिरारिघातकः ६० तिष्यस्तुलाधरोजीयोविश्लेषोयोगराट्विराट् मानदोमा
भारक धवोमाघोवात्वालोमघवोमतः ६१ माघोमघाप्रियोमाघोमहामुंडोमहाभुजः पूर्वफाल्गुनि १
कःस्फीतः फल्गुरुत्तरफाल्गुनः ६२ केनिकोब्रह्मदोब्रह्मासहस्तंतुसमाश्रिताः घोणहस्तश्चतु
लगु हस्तोहस्तिवक्त्रोहलायुधः ६३ चित्रांबरोर्चितपदःस्वाहितःस्वातिविग्रहः ।शाखिरवःशाखिसे

यश्चशिखिध्वजसहोदरः ६४ अणुरेणुकरस्फारोकुहरेणुस्कृतौनेः अनुराधाप्रियोराधः
श्रीमान्छुक्लःशुचिस्मितः ६५ ज्येष्ठाश्रेष्ठार्चितमनामूलात्रिजगलस्तथा शुचिःपूर्वस्तथापादः
श्चोत्तरस्तथाहुएवच ६६ ईश्वरश्चाविरभिजिदनंतात्मानश्रवसे श्रवणंश्रवणश्रोता धनी
धन्योधनिष्ठकः ६७ शतातपःशातःकुंभःशातज्योतिःशतताभिषक् पूर्वभाद्रपदोभाद्रउत्त
रोभाद्रपादितः ६८ रेणुकातनयोरामोरेवतीरमणोरमः रज्यदोश्चिगात्मीयस्तारो
शस्तारकाकृतिः ६९ प्रतीतःप्रोज्झितःपीतःपारसःपरमोहितः परहापंचभूतःसवायुपूज्यःपरं
महः ७० पुराणागमवेद्योमाहिषोराससभोग्रगः श्राहोमेषोवृषामंदोमन्मथोमिथुना
र्चितः ७१ कल्कश्चकर्कटोदानोमर्कटःकर्कटीघृणी कुक्कुटोवनजोहंसःपरंहंसःसृगाल
कः सिंहःसिंहासनःसर्पीमोहीमृगवाहनः पुत्रदोनरकात्राता कन्याप्रीतःकुलोद्वहः ७३
अतुल्यरूपोबलदःस्तुत्यश्चतुल्यसात्विकः अलिश्चापधरोयज्वीकच्छपोमकरोमणिः ७४
कुंभःकल्कशी कुंभोमीनमांसतर्पितः राशिताराग्रहमयास्तिथिरूपोजगत्प्रभुः ७५
प्रतापीप्रतिपत्श्रेयाद्वितीयोद्वैतनिश्चयः त्रिरूपश्चतृतीयाग्निस्त्रयीरूपस्त्रयीतनुः ७६

चतुर्थीवत्सलो देवः पारगः पंचमीरवः षड्रसास्वादको ज्ञाता षष्ठीलालकवत्सरः ७७ सप्तार्णव
रा०स० गतिः सारः सप्तमीश्वर ईश्वरः अष्टमीनंदनोनंतो नवमीभक्तिपूजितः ७८ दशदिक्पतिपूज्य
१० श्च दशमीद्रौहिणो मतः एकादशात्मा गणपो द्वादशीयुगवर्धितः ७९ त्रयोदशमनुस्तुत्यश्चतुर्द
शस्वरप्रियः चतुर्दशेंद्रसंस्तुत्यः पूर्णिमानंदविग्रहः ८० दर्शो दर्शो दर्शनश्च वानप्रस्थो मुनी
श्वरः मौनी मधुरवाक्स्थूलं मूर्तिमान्मेघवाहनः ८१ महागजो जितक्रोधो जितशत्रुर्जयाश्र
५ यः रौद्रो रुद्रप्रियो रुद्रो रुद्रपुत्रोघतापनः ८२ भवप्रियो भवानीशो भवाख्यो भक्तवाहितः
गंधर्वकुशलः कुंठो वैकुंठो विष्णुसेवितः ८३ हत्रहाविघ्नहासी रसमस्तदुरितापहः मंजरो
मार्ज्यो मार्जरोमनो दुर्गापुत्रो दुरालसः ८४ अनंतविस्तरधासारो वीरवीर्यैकवीर्यदः भा
स्वन्मुकुटमाणिक्यकूजत्किंकिणिजालकः ८५ शुंडाधारी चंचलश्च कुंडली मुंडमालिकः पद्मा
क्षः पद्महस्तश्च पद्मनाभसमर्चितः ८६ तद्धीनो नरदंताख्यमालाभूषणभूषितः नारदेव
रणो लोलश्रवणः शून्यकर्णकः ८७ बृहदुल्लासनासाग्रव्याप्तत्रैलोक्यमंडलः इडामंडलसंभ्रांत १०
कृतानुग्रहजीवकः ८८ बृहत्कर्णांजलीभूतवायुवीजितदिक्तटः बृहदास्यरवाक्रांतभीम

ब्रह्मांडभांडकः ८९ बृहत्पादसमाक्रांतसप्तपातालवेपितः बृहद्दंतकृतात्यंतचरणानंदर
सालभः ९० बृहद्धस्तधृताशेषायुधनिर्जितदानवः स्फुरसिंदूरवदनः स्फुरत्तेजोग्नि
लोचनः ९१ नद्दीपितमणिस्फूर्जन्नूपुरध्वनिनादितः चलत्तोयप्रवाहाढ्यनदीजलक
णाकरः ९२ भ्रमत्कुंजरसंघातवंदितांघ्रिसरोरुहः ब्रह्माच्युतमहारुद्रपुरःसुरासुरार्चितः
९३ अशेषदोषप्रशांतिव्याजालोपसेवितः गर्जत्पंचाननारावप्राप्ताकाशधरातलः ९४
हाहाहूहूकृतात्यक्तस्वरविश्रांतमानसः पंचाशद्वर्णबीजाढ्यमंत्रमंत्रितविग्रहः ९५ वे
दांतशास्त्रपीयूषधाराप्लावितभूतलः शंखध्वनिसमाक्रांतपातालादिनभस्तलः ९६
चिंतामणिमहासद्मा भद्रहस्तो बलिः कलिः कृतत्रेतायुगोल्लाससमानजगत्त्रयः ९७
द्वापारः परलोकैककर्मध्वांतसुधाकरः सुधासिक्तवपुर्व्याप्तब्रह्मांडादिकदाहकः ९८
अकारादिक्षकारांतवर्णपंक्तिसमुज्वलः आकारकारयाद्गीततारनादनिनादितः ९९
इकारेकारमंत्राद्यमालाभ्रमणलालसः उकारोकाररूपैकघोरनागोपवीतकः १००
ऋवर्णांकितलृकारपद्मद्वयसमुज्वलः एकारमुतहीकारशंखपूर्णदिगंतरः १०१

एकारैकारगिरिजास्तनपानविचक्षणः ॐकारौकारविश्वादिकृतस्फटिकपालसः २
ग॰ स॰ अंअःवर्णावलीव्याप्तपादादिशीर्षमंडलः कर्णतालकृतास्फप्रवायुवीजितनिर्जरः ३
२१ खगेशध्वजरत्नांककिरीटारुणपादकः गर्विताशेषगंधर्वगानतत्परश्रोत्रकः ४
धनवाहनवागीशपुरःसरसुरार्चितः ॐवर्णामृतधाराढ्यशोभमानैकदंतकः ५ चंद्रकुं इ॰
कुमजंबालालिप्तसुंदरश्रीविग्रहः छत्रचामररत्नाढ्यमुकुटालंकृताननः ६ ऊदावकृ
महानर्घमणिपंक्तिविराजितः स्तंकारिमधुपव्रातगीतनादनिनादितः भुवर्णकृतसंहा
रदैत्यास्रसूर्णमुद्गरः दंकारुककलास्वादतोषिताशेषमर्दुजः ८ अकारसंधिदुंकारांतढ
कारानंदतोषितः णावर्णांकितपापीयूषधाराधरसुधाधरः ९ ताम्रसिंदूरपुंजाभ्यल
लाटफलकच्छविःधकारधनपत्याद्यसंतोषितद्विजव्रतः १० दयामयहृदंभोजधृत
त्रैलोक्यमंडलः धनदादिमहायक्षसंसेवितपदांबुजः ११ नमिताशेषदेवौघकिरीटमणि १२
रंजितः परवर्णपवर्गादिमार्गछेदनरक्षकः १२ फणिचक्रसमाक्रांतगलमंडितमंडितः
बकुभ्रूयुगभीमोग्रसंतर्जितसुरासुरः १३ भवानीहृदयानंदवर्द्धनैकनिशाकरः मादि
देवौघ
ऊकारादि ८ ५

राकलशस्फीतकरालैककरांबुजः यशांतरायसंघारघातसज्जीकृतायुधः रत्नाकरसु
ताकांतकांतिकीर्तिऽविवर्द्धनः १५ लंबोदरमहाभीमवपुर्दीनोकृतांबरः वरुणादिदिगी
शानरसितार्वनचर्चितः १६ शकारैकप्रियोन्मत्तमनयनानंदवर्द्धनः षोडशस्वरि
तालापगीतगानविचक्षणः १७ समस्तदुर्गतिसरिन्नाथोत्तारणकौतुकः हरादित्र
सवैकुंठब्रह्मगीतादिपाठकः १८ क्षमापूरितहृत्सद्मसंरक्षितचराचरः तारांकमंत्रव
र्णाकविग्रहोज्वलविग्रहः १९ अकारादिक्षकारांतविद्याभूषितभूषणः ॐश्रींवि
नायक ॐह्रीं विघ्नाध्यक्षोगणाधिपः हेरंबोमोदकाहारोवक्रतुंडोविधिःस्मृतः
वेदांतगीतोविद्यार्थिसिद्धमंत्रःषडक्षरः २१ गणेशोवरदोदेवोद्वादशाक्षरम
न्त्रितः सप्तकोटिमहामंत्रमंत्रिताशेषविग्रहः २२ गांगेयोगणसेव्यश्चॐश्री
द्वैमातुरःशिवः ॐश्रींह्रींक्लींग्लौंगंदेवोमहागणपतिःप्रभुः २३ इदंनाम्नां
सहस्रंतुमहागणपतेःस्मृतं गुह्यंगोप्यतमंगोप्यंसर्वमंत्रैकगोपितं २४

ग.स. सर्वमंत्रनिधिं दिव्यं सर्वविघ्नविनाशनं ग्रहतारामयं राशिवर्णपंक्तिसमुज्वलं २५
सर्वविद्यामयं ब्रह्मसाधनं साधकप्रियं गणेशस्य तु सर्वस्वं रहस्यं त्रिदिवौकसां २६
१२ यथेष्टफलदं लोके मनोरथप्रपूरणं अष्टसिद्धिमयं साध्यं साधकानां जयप्रदं २७
विनार्चनं विना होमं विना न्यासं विनार्चनं अणिमाद्यष्टसिद्धीनां साधनं स्मरतिमात्रतः २८
चतुर्थ्यामर्धरात्रे तु पठेन्मंत्री चतुष्पथे लिखेद्भूर्जे महादेवि पुण्यं नाम्नां सहस्रकं २९
धारयेत्त चतुर्दश्यां मध्याह्ने मूर्ध्नि वा भुजे स्त्री भवेदपि ब्रह्माणं मोहयेदपि शंकरं ३०
वशयेदपि त्रैलोक्यं मारयेत्खिलान्रिपून् उच्चाटयेद्रोगगणान्शमयेत्तु धनंजयं ३१
वंध्या पुत्रं लभेद्धीमान् निर्धनो धनमाप्नुयात् त्रिवारं यः पठेत्प्रातर्गणेशस्य पुरः शिवे ३२
नरनाः शक्तिसुतोदवि भुक्त्वा भोगान्यथेप्सितान् प्रत्यक्षं वरदं पश्येद्गणेशं वरदोत्तमं ३३
य एवं पठते नित्यं सहस्रं भक्तिपूर्वकं तस्य विन्नादिविघ्नवो दारायुः संपदस्तथा ३४ रणे
राजभये पूते पठेन्नाम्नां सहस्रकं सर्वत्र जयमाप्नोति गणेशस्य प्रसादतः ३५ इती १२
दं पुण्यसर्वस्वं मंत्रनाम्नां सहस्रकं महागणपतेर्गोप्यं गोपनीयं स्वयोनिवत् ३६

इति श्रीरुद्रयामले तंत्रे महागणपतिसहस्रनामस्तवः समाप्तः श्रीदेव उवाच
भगवन्परमेशान महागणपतेर्विभोः स्तोत्रराजाधिपं ब्रूहि मूलमंत्रस्य तत्वतः १
श्रीभैरव उवाच महागणपतेर्वक्ष्ये स्तोत्रं तत्वनिरूपणं देवस्याग्रे कलौ शीघ्रं जीवन्मुक्तिप्रदा
यकं २ अस्य श्रीमहागणपतिस्तोत्रस्य श्रीभैरव ऋषिः गायत्री छंदः गं बीजं ह्रीं श
क्तिः कुरुकुरु कीलकं जीवन्मुक्तिप्राप्त्यर्थे महागणपतिस्तोत्रपाठे विनियोगः द्विचतुर्द
शवर्णप्रकल्पितांगं शशिसूर्याग्निविलोचनं सुरेशं व्याहिभूषितकंठमक्षसूत्रमयं तं
हृदये स्मरे गणेशं १ तारं नारदगीतमादिमनिशं यः साधके प्रोजपेद्रात्रावीजं दिशासु नि
त्ववशवश्चमिन्यालये वाप्रभो तस्य स्मेरमुखांबुजाः प्रतिदिनं लावण्यदर्पोज्वलाः स्व
र्वैरप्यास्च वशीभवंति त्रिदिवेभ्रमौ समस्तान्नृपाः २ सकलं सकलं जपेपदगणनाथप्रि
यमंत्रमेवयः सकलक्ष्मापतिमूर्धनिस्फुरच्चरणाओजु विशोभते वसः ३ कमलांक
मलास्पहा वयो हृदये ध्यायति देवमध्यगं तवमंत्रप्रसादकमला सपनितस्यानिश्च
वतः सदा

कामराजमनिशंस्तनोतरे संघहीनं ३

धीयतेधर मंत्रो० ला ४ कामिनीस्मरतादि स्थितरोयोस्तजे ऊं दिगणेशनावकं उर्वशीवदनपद्ममधुपं द्रूपदे

धराकुसमधुपरागकाम्यतां ५ पठन्नवेयोनिशिशम्यगेहे विमुक्तकेशोगणनायकं

१३ स्तवं रणारिपूर्णेंद्रसमान्विऊत्स्यप्राप्नोतिराज्यंरिपुं ६ शिवार्णमंतर्यदिसाधकोऊ

हैमो वेदरण्येशिवसन्निधौविभोः चराचरेषुप्रवरोहिमानीऊगत्यशेषागमचक्रवर्ती ७

गणपतयइतिमूलमंत्रंयोऊपतेपठते गणाधिप सिद्धसुरासुरनमितोलसतोगाणा

किन्नर पत्यंसः ८ वरदेतिवमंत्रमिमंयोऊपतेनिशिवादिवसेनिशं सदनेसततंवदनेवव्यद

सतेहृदिदीर्घकमलातवभक्तिरपि ९ सर्वऊनंमेइतिमंत्रराजं ऊपंतियेसोऊनकाव

साने भजंतितेनंदनचंदनानि हसेषुलीलांसुरसुंदरीभिः १० वशामानयेतिभगवन्य

दिऊपतिस्मरतसहृदयश्च वशमेतिकिन्नरसुताप्युर्वशीसततसुरतदक्षा ११

स्वाहेतिमंत्राक्षरयुग्ममेतज्जपेदिनांतेप्यशनादिकाले रोगाअशेषाः प्रलयंप्रयां १२

तितपांसिस्वर्यभ्युदितेयथावा १२ पद्महस्तमम्लतांशुसान्निभंशंखयुग्ममपरेच

दधानं अक्षमग्निसदृशंस्मरंतिये तेप्रयांतित्रिदिवंविमानगाः १३ बिंदुत्र्यस्रदशार

वासयुक्कला वेदास्रमध्येविभोयेध्यायंतिभवंनमीड्यवपुषं त्रैलोक्यरक्षापरं १४ जित्वा

भूमिमनल्पकल्पनिवहांभुक्त्वासहायैर्युताःपश्चाद्यांतिगणेशतावकपदंदेवासुरैर्ई

ऊतं १५ इतिगणपतेःस्तोत्रंमंत्रात्मकंपरमंऊपेसततिशृणुयाद्भक्त्यानित्यंसम

स्तरहस्यकं १६ इहधनपतिलक्ष्मींसाधुःशुभांलभतेऽचिराद्व्रजतित्रिदिवंऊीवन्

मुक्तःपरत्रसमादकः १७ इतिस्तवोत्तमंदेविमहागणपतेःपरं गोप्यंगुप्तंसदागो

प्यंपंचांगंसुरसुंदरि १६ पंचांगंचगणेशस्यरहस्यंममपार्वति विनाशिष्यायं

नोदद्यात्साधकायविनातथा १७ विनादानंनदातव्यंविनादानंनग्राहयेत् अ

न्यथासिद्धिहानिःस्यात्सर्वथादानमाचरेत् १८ पटलंपद्धतिंवर्ममंत्रनामसह

स्रकं स्तोत्रंपंचांगमखिलंगोपनीयंस्वयोनिवत् १९ इतिरुद्रयामलेतंत्रेमहाग

णपतिस्तोत्रंसंपूर्णम् श्रीसांबसदाशिवार्पणमस्तु श्रीः

वेदांकभूयुक्शाकेनंदनेब्दे नभःसिते पटलंपद्धतिंवर्ममंत्रनामसहस्रकं

स्तोत्रंपंचांगमखिलंसीतारामःसमालिखत् १